# shrIchaturviMshatyavatArastotram 2

# શ્રીચતુર્વિંશત્યવતારસ્તોત્રમ્ ૨

## Document Information

Text title : chaturviMshatyavatArastotram 2

File name : chaturviMshatyavatArastotram2.itx

Category : vishhnu, dashAvatAra, stotra, vishnu, chaturviMshati

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : prathamaskandhe naimiShIyopAkhyAne tRitIyo.adhyAyaH

Latest update : December 5, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 5, 2021

*sanskritdocuments.org*

# શ્રીચતુર્વિંશત્યવતારસ્તોત્રમ્ ૨

ભાગવતપુરાણાન્તર્ગતમ્ સર્ગ ૧ અધ્યાય ૩
સૂત ઉવાચ ।
જગૃહે પૌરુષં રૂપં ભગવાન્મહદાદિભિઃ ।
સમ્ભૂતં ષોડશકલમાદૌ લોકસિસૃક્ષયા ॥ ૧॥

યસ્યામ્ભસિ શયાનસ્ય યોગનિદ્રાં વિતન્વતઃ ।
નાભિહ્રદામ્બુજાદાસીદ્બ્રહ્મા વિશ્વસૃજાં પતિઃ ॥ ૨॥

યસ્યાવયવસંસ્થાનૈઃ કલ્પિતો લોકવિસ્તરઃ ।
તદ્વૈ ભગવતો રૂપં વિશુદ્ધં સત્ત્વમૂર્જિતમ્ ॥ ૩॥

પશ્યન્ત્યદો રૂપમદભ્રચક્ષુષા સહસ્રપાદોરુભુજાનનાદ્ભુતમ્ ।
સહસ્રમૂર્ધશ્રવણાક્ષિનાસિકં સહસ્રમૌલ્યમ્બરકુણ્ડલોલ્લસત્ ॥ ૪॥

એતન્નાનાવતારાણાં નિધાનં બીજમવ્યયમ્ ।
યસ્યાંશાંશેન સૃજ્યન્તે દેવતિર્યઙ્નરાદયઃ ॥ ૫॥

સ એવ પ્રથમં દેવઃ કૌમારં સર્ગમાશ્રિતઃ ।
ચચાર દુશ્ચરં બ્રહ્મા બ્રહ્મચર્યમખણ્ડિતમ્ ॥ ૬॥

દ્વિતીયં તુ ભવાયાસ્ય રસાતલગતાં મહીમ્ ।
ઉદ્ધરિષ્યન્નુપાદત્ત યજ્ઞેશઃ સૌકરં વપુઃ ॥ ૭॥

તૃતીયમૃષિસર્ગં વૈ દેવર્ષિત્વમુપેત્ય સઃ ।
તન્ત્રં સાત્વતમાચષ્ટ નૈષ્કર્મ્યં કર્મણાં યતઃ ॥ ૮॥

તુર્યે ધર્મકલાસર્ગે નરનારાયણાવૃષી ।
ભૂત્વાત્મોપશમોપેતમકરોદ્દુશ્ચરં તપઃ ॥ ૯॥

પઞ્ચમઃ કપિલો નામ સિદ્ધેશઃ કાલવિપ્લુતમ્ ।
પ્રોવાચાસુરયે સાઙ્ખ્યં તત્ત્વગ્રામવિનિર્ણયમ્ ॥ ૧૦॥

ષષ્ઠમત્રેરપત્યત્વં વૃતઃ પ્રાપ્તોઽનસૂયયા ।
આન્વીક્ષિકીમલર્કાય પ્રહ્લાદાદિભ્ય ઊચિવાન્ ॥ ૧૧॥

તતઃ સપ્તમ આકૂત્યાં રુચેર્યજ્ઞોઽભ્યજાયત ।
સ યામાદ્યૈઃ સુરગણૈરપાત્સ્વાયમ્ભુવાન્તરમ્ ॥ ૧૨॥

અષ્ટમે મેરુદેવ્યાં તુ નાભેર્જાત ઉરુક્રમઃ ।
દર્શયન્વર્ત્મ ધીરાણાં સર્વાશ્રમનમસ્કૃતમ્ ॥ ૧૩॥

ઋષિભિર્યાચિતો ભેજે નવમં પાર્થિવં વપુઃ ।
દુગ્ધેમામોષધીર્વિપ્રાસ્તેનાયં સ ઉશત્તમઃ ॥ ૧૪॥

રૂપં સ જગૃહે માત્સ્યં ચાક્ષુષોદધિસમ્પ્લવે ।
નાવ્યારોપ્ય મહીમય્યામપાદ્વૈવસ્વતં મનુમ્ ॥ ૧૫॥

સુરાસુરાણામુદધિં મથ્નતાં મન્દરાચલમ્ ।
દધ્રે કમઠરૂપેણ પૃષ્ઠ એકાદશે વિભુઃ ॥ ૧૬॥

ધાન્વન્તરં દ્વાદશમં ત્રયોદશમમેવ ચ ।
અપાયયત્સુરાનન્યાન્મોહિન્યા મોહયન્સ્ત્રિયા ॥ ૧૭॥

ચતુર્દશં નારસિંહં બિભ્રદ્દૈત્યેન્દ્રમૂર્જિતમ્ ।
દદાર કરજૈરૂરાવેરકાં કટકૃદ્યથા ॥ ૧૮॥

પઞ્ચદશં વામનકં કૃત્વાગાદધ્વરં બલેઃ ।
પદત્રયં યાચમાનઃ પ્રત્યાદિત્સુસ્ત્રિવિષ્ટપમ્ ॥ ૧૯॥

અવતારે ષોડશમે પશ્યન્બ્રહ્મદ્રુહો નૃપાન્ ।
ત્રિઃસપ્તકૃત્વઃ કુપિતો નિઃક્ષત્રામકરોન્મહીમ્ ॥ ૨૦॥

તતઃ સપ્તદશે જાતઃ સત્યવત્યાં પરાશરાત્ ।
ચક્રે વેદતરોઃ શાખા દૃષ્ટ્વા પુંસોઽલ્પમેધસઃ ॥ ૨૧॥

નરદેવત્વમાપન્નઃ સુરકાર્યચિકીર્ષયા ।
સમુદ્રનિગ્રહાદીનિ ચક્રે વીર્યાણ્યતઃ પરમ્ ॥ ૨૨॥

એકોનવિંશે વિંશતિમે વૃષ્ણિષુ પ્રાપ્ય જન્મની ।
રામકૃષ્ણાવિતિ ભુવો ભગવાનહરદ્ભરમ્ ॥ ૨૩॥

તતઃ કલૌ સમ્પ્રવૃત્તે સમ્મોહાય સુરદ્વિષામ્ ।
બુદ્ધો નામ્નાઞ્જનસુતઃ કીકટેષુ ભવિષ્યતિ ॥ ૨૪॥

અથાસૌ યુગસન્ધ્યાયાં દસ્યુપ્રાયેષુ રાજસુ ।
જનિતા વિષ્ણુયશસો નામ્ના કલ્કિર્જગત્પતિઃ ॥ ૨૫॥

અવતારા હ્યસઙ્ખ્યેયા હરેઃ સત્ત્વનિધેર્દ્વિજાઃ ।
યથાવિદાસિનઃ કુલ્યાઃ સરસઃ સ્યુઃ સહસ્રશઃ ॥ ૨૬॥

ઋષયો મનવો દેવા મનુપુત્રા મહૌજસઃ ।
કલાઃ સર્વે હરેરેવ સપ્રજાપતયઃ સ્મૃતાઃ ॥ ૨૭॥

એતે ચાંશકલાઃ પુંસઃ કૃષ્ણસ્તુ ભગવાન્સ્વયમ્ ।
ઇન્દ્રારિવ્યાકુલં લોકં મૃડયન્તિ યુગે યુગે ॥ ૨૮॥

જન્મ ગુહ્યં ભગવતો ય એતત્પ્રયતો નરઃ ।
સાયં પ્રાતર્ગૃણન્ભક્ત્યા દુઃખગ્રામાદ્વિમુચ્યતે ॥ ૨૯॥

એતદ્રૂપં ભગવતો હ્યરૂપસ્ય ચિદાત્મનઃ ।
માયાગુણૈર્વિરચિતં મહદાદિભિરાત્મનિ ॥ ૩૦॥

યથા નભસિ મેઘૌઘો રેણુર્વા પાર્થિવોઽનિલે ।
એવં દ્રષ્ટરિ દૃશ્યત્વમારોપિતમબુદ્ધિભિઃ ॥ ૩૧॥

અતઃ પરં યદવ્યક્તમવ્યૂઢગુણબૃંહિતમ્ ।
અદૃષ્ટાશ્રુતવસ્તુત્વાત્સ જીવો યત્પુનર્ભવઃ ॥ ૩૨॥

યત્રેમે સદસદ્રૂપે પ્રતિષિદ્ધે સ્વસંવિદા ।
અવિદ્યયાત્મનિ કૃતે ઇતિ તદ્બ્રહ્મદર્શનમ્ ॥ ૩૩॥

યદ્યેષોપરતા દેવી માયા વૈશારદી મતિઃ ।
સમ્પન્ન એવેતિ વિદુર્મહિમ્નિ સ્વે મહીયતે ॥ ૩૪॥

એવં ચ જન્માનિ કર્માણિ હ્યકર્તુરજનસ્ય ચ ।
વર્ણયન્તિ સ્મ કવયો વેદગુહ્યાનિ હૃત્પતેઃ ॥ ૩૫॥

સ વા ઇદં વિશ્વમમોઘલીલઃ સૃજત્યવત્યત્તિ ન સજ્જતેઽસ્મિન્ ।
ભૂતેષુ ચાન્તર્હિત આત્મતન્ત્રઃ ષાડ્વર્ગિકં જિઘ્રતિ ષડ્ગુણેશઃ ॥ ૩૬॥

ન ચાસ્ય કશ્ચિન્નિપુણેન ધાતુરવૈતિ જન્તુઃ કુમનીષ ઊતીઃ ।
નામાનિ રૂપાણિ મનોવચોભિઃ સન્તન્વતો નટચર્યામિવાજ્ઞઃ ॥ ૩૭॥

સ વેદ ધાતુઃ પદવીં પરસ્ય દુરન્તવીર્યસ્ય રથાઙ્ગપાણેઃ ।

યોઽમાયયા સન્તતયાનુવૃત્ત્યા ભજેત તત્પાદસરોજગન્ધમ્ ॥ ૩૮॥

અથેહ ધન્યા ભગવન્ત ઇત્થં યદ્વાસુદેવેઽખિલલોકનાથે ।
કુર્વન્તિ સર્વાત્મકમાત્મભાવં ન યત્ર ભૂયઃ પરિવર્ત ઉગ્રઃ ॥ ૩૯॥

ઇદં ભાગવતં નામ પુરાણં બ્રહ્મસમ્મિતમ્ ।
ઉત્તમશ્લોકચરિતં ચકાર ભગવાનૃષિઃ ॥ ૪૦॥

નિઃશ્રેયસાય લોકસ્ય ધન્યં સ્વસ્ત્યયનં મહત્ ।
તદિદં ગ્રાહયામાસ સુતમાત્મવતાં વરમ્ ॥ ૪૧॥

સર્વવેદેતિહાસાનાં સારં સારં સમુદ્ધૃતમ્ ।
સ તુ સંશ્રાવયામાસ મહારાજં પરીક્ષિતમ્ ॥ ૪૨॥

પ્રાયોપવિષ્ટં ગઙ્ગાયાં પરીતં પરમર્ષિભિઃ ।
કૃષ્ણે સ્વધામોપગતે ધર્મજ્ઞાનાદિભિઃ સહ ॥ ૪૩॥

કલૌ નષ્ટદૃશામેષ પુરાણાર્કોઽધુનોદિતઃ ।
તત્ર કીર્તયતો વિપ્રા વિપ્રર્ષેર્ભૂરિતેજસઃ ॥ ૪૪॥

અહં ચાધ્યગમં તત્ર નિવિષ્ટસ્તદનુગ્રહાત્ ।
સોઽહં વઃ શ્રાવયિષ્યામિ યથાધીતં યથામતિ ॥ ૪૫॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં સંહિતાયાં પ્રથમસ્કન્ધે
નૈમિષીયોપાખ્યાને તૃતીયોઽધ્યાયઃ ॥

From Srimad Bhagavatam Canto-sarga 1 chapter-adhyAya 3
This stotram praises the 24 (22+ haMsa and hayagrIva not mentioned here)
important incarnations of Vishnu as described in Srimad Bhagavatam
Canto 2 chapter 7 with some variations.

Proofread by Psa Easwaran

*shrIchaturviMshatyavatArastotram 2*

pdf was typeset on December 5, 2021

Please send corrections to *sanskrit@cheerful.com*